दे व वा णी म न्दि र मु ख प त्र म्
प्रा रं भः १९७९

# गीर्वाणसुधा

यथा पयोधेर्लहरीप्रसूता सुधा सुराणाममृतत्वहेतुः।
तथैव गीर्वाणसुधापि भूयात् नवीनसारस्वतवीचिभूतेः॥

खण्डः ३९ आश्विन–फाल्गुन शके १९३९ अङ्काः १०–३
ऑक्टोबर–मार्च २०१७–१८

संस्थापक : श्री. भि. वेलणकर
प्रधानसंपादक : प्रा. डॉ. सौ. कमल अभ्यंकर
संपादनसाहाय्यम् : सौ. वीणा गोडबोले



विमानसेवाद्वारा परदेशे प्रेष्यते।

देववाणीमन्दिरम्
भीमाबाई राणे शाळा, तळमजला, राजा राममोहन रॉय मार्ग, गिरगाव, मुंबई–४
devavaneemandiram@gmail.com

संस्थायै प्रदत्तं दानं S. 80-G आयकर–विधानद्वारा करमुक्तिं लभते।
(Exemption of Tax as per S. 80-G, I.T. Act 1961 is available to our donors.)

वर्षम् : ३९ अङ्काः - १०-३

# गीर्वाणसुधा ।

संस्थापकः
पंडित श्रीराम वेलणकर
**देववाणीमन्दिरम्** - भीमाबाई राणे शाळा, तळमजला, राजा राममोहन रॉय मार्ग, गिरगाव, मुंबई - ४०० ००४. (भारत)
**आश्विन-फाल्गुन शके १९३९-४०** **ऑक्टोबर-मार्च २०१७-१८**

## संपादकीयम्

सुहृदः

अतित्वरया समाप्तप्रायमेव एतद् संवत्सरम्। अस्य वर्षस्य 'गीर्वाणसुधायाः' अयम् अन्तिमोऽङ्कः किंचित् विलम्बेन प्रकाश्यते, एतदर्थं क्षमापनं इष्यते ।

संस्कृतविदुषां तथा संस्कृतकार्यकर्तॄणां संक्षिप्तपरिचयदानस्य अस्माकं संकल्पः अविरतः एव। तद्पूर्त्यर्थम् अन्यसंस्कृतविद्वद्भ्यः तथा संस्कृतकार्यकर्तृभ्यः स्वपरिचयप्रेषणार्थं सविनयम् आवाहनं क्रियते अस्माभिः ।

अस्मिन् अङ्के डॉ. गौरी माहुलीकरमहोदयायाः श्रीलङ्काविषयक-लेखमालायाः द्वितीयः भागः तथा डॉ. नीलेश जोशीमहोदयानां लेखः अवश्यं जिज्ञासाकरौ। तथैव कार्व्हरः (क्रमशः), कुराणस्य संस्कृतानुवादः (क्रमशः), देववाणीमन्दिरस्य विविधोपक्रमाः तथा संस्कृतजगति वर्तमानाः घटनाः, वार्ताः इत्यादिकम् अन्तर्भूतमेव।

संस्कृतानुरागिणः, देववाणीमन्दिरस्य दृढ-आधारभूतस्य, नौकाव्यवस्थापनक्षेत्रे प्रथितयशसः श्री. सुरेश गोडबोलेमहोदयस्य दुःखदं निधनं सञ्जातम्। तेभ्यो गीर्वाणसुधाद्वारा भावपूर्णः आदराञ्जलिः।

आगामि-नूतनं संवत्सरं सर्वेषां कृते सुख-शान्ति-समृद्धिकरं भवेत्, इत्येव प्रार्थना।

# प्रातिशाख्यग्रन्थपरिचयः ।

(लेखाङ्कः १)

– डॉ. नीलेश जोशी

**दुष्टः शब्दः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**
**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥**

पा.शि.श्लो.क्र.५२

अनेन श्लोकेन ये ये स्वराणां वर्णानां वा दोषाः निषिद्धाः सन्ति तेभ्यो दोषेभ्यो वैदिकं वाङ्मयं शिक्षाशास्त्रमेव त्रायते । यतोऽयं वर्णः स्वरो वा एवमुच्चारणीय इति नियमान् शिक्षाशास्त्रं बोधयति । अतः वेदस्य षट्स्वङ्गेषु शिक्षाङ्गस्य प्राथमिकता प्रतिपाद्यते । वर्णोच्चारणविषयेऽनेकेषामृषीणां मतान्यत्र शिक्षाग्रन्थे प्रदर्शितानि सन्ति ।

सहस्रेभ्योऽपि वर्षेभ्यः पूर्वं वैदिकपरम्परासु विभिन्नया पद्धत्या वेदमन्त्राणां पाठः क्रियते स्म । यतः वेदानां बहुविधाः शाखाः सन्ति । अतः शिक्षाग्रन्थेषूच्चारणादिविषये सामान्यनियमाः प्रतिपादिताः सन्ति, ते नियमाः विभिन्नवेदशाखासु कथं प्रयोजनीयाः तन्निर्णेतुं प्रातिशाख्यग्रन्थानां रचना अभवत् ।

प्रतिशाख्यं भवम् इति तत्र भवः (पा.सू.४.३.५३) इत्यनेन सूत्रेण "प्रातिशाख्यम्" शब्दः सिध्यते । प्रातिशाख्यानि न केवलं शिक्षाग्रन्थेष्वाधृतानि अपितु व्याकरणे तथा च कदाचित्तु छन्दःशास्त्रेष्वाश्रितानि दृश्यन्ते यथा ऋक्प्रातिशाख्ये चतुर्थं पटलं सन्धिनियमविषयकं तथा १६–१८ पटलानि छन्दःशास्त्रविषयकानि सन्ति । प्रातिशाख्यानां मूलभित्तिः पदपाठः यस्य ज्ञानं व्याकरणेन विना असम्भवनीयम् । अथर्वप्रातिशाख्ये कथ्यते –

चतुर्णां पदजातानां नामाख्यातोपसर्गनिपातानां सन्ध्यपदौ गुणौ प्रातिज्ञम्। (च.अ.१.१। )

अनेन सूत्रेण संहितापदपाठयोः नाम चाख्यातं चोपसर्गाश्च निपाताः समुपलभ्यन्ते तेषां विवेचनमेवोद्देश्यः प्रातिशाख्यरचनायाः ।

प्रातिशाख्यानां रचनाकालविषये मतभेदाः सन्ति । कीथमहोदयस्य मतेन तैत्तिरीयप्रातिशाख्यं यास्काचार्यादपि प्राचीनम् । (कीथ, तै. प्रा.अनु.उपोद्.पृ.४१)। सिद्धेश्वरवर्मामतानुसारेण वर्तमानां प्रातिशाख्यग्रन्थानां

समयः सामान्यतः ई.पू.५०० तथा ई.पू.१५० कालयोर्मध्ये । (सिद्धेश्वरवर्मा, CSP,पृ.६६)

प्रातिशाख्यग्रन्थानां मुख्यः प्रतिपाद्यो विषयः पदपाठेषु पठित-पदानामुच्चारणं स्वरसन्धानं ह्रस्वदीर्घविधानं च । संहितायां पदानां सम्भवनीयपरिवर्तनस्याध्ययनमपि । संहितायाः पदपाठे परिवर्तनविषयकाः नियमाः तथोच्चारणजन्यविकाराणां चर्चा च ।

सारांशतः प्रातिशाख्यग्रन्थानां परिचयोऽत्यावश्यकः सम्यग्वेदपद-पाठादिकर्मणि नैपुण्यसम्पादनार्थम् । अधुना साम्प्रतकाले अष्टौ प्रातिशाख्यग्रन्था उपलब्धाः प्रकाशिताश्च सन्ति ते यथा -

१. ऋक्प्रातिशाख्यम् - ऋग्वेदसम्बन्धिः ।
२. वाजसनेयिप्रातिशाख्यम् - शुक्लयजुर्वेदसम्बन्धिः ।
३. तैत्तिरीयप्रातिशाख्यम् - कृष्णयजुर्वेदसम्बन्धिः ।
४. ऋक्तन्त्रम् - सामवेदसम्बन्धिः । - (सामप्रातिशाख्यम्)
५. सामतन्त्रम् - सामवेदसम्बन्धिः ।
६. पुष्पसूत्रम् - सामवेदसम्बन्धिः ।
७. चतुरध्यायिका - अथर्ववेदसम्बन्धिः ।
८. अथर्वप्रातिशाख्यम् - अथर्ववेदसम्बन्धिः ।

एतेषां प्रातिशाख्यग्रन्थानां सङ्क्षेपतः परिचयोऽस्याः लेखमालायाः उद्देशः। अनेन वैदिकपरम्परासु यया पद्धत्या वैदिकमन्त्राणामुच्चारणं क्रियते तस्याः पद्धत्याः शास्त्रोक्तस्वरूपमवगम्येत तथा दुरोहो विषयो यत् कस्मिन् वर्णे कुत्र ह्रस्वः क्व च दीर्घं क्व च द्विर्वचनम् ? विसर्गोच्चारणे अङ्गुलिसङ्केतः कीदृशो भवेत् ? एतत्सर्वमत्र प्रातिशाख्यग्रन्थपरिचयेन सुलभं भवेतित्याशास्ते।

**सन्दर्भग्रन्थाः :-**

- संपा.आचार्य श्रीरामप्रसाद त्रिपाठी, शिक्षासंग्रहः, प्रका.संपूर्णानंद संस्कृत-विश्वविद्यालयः, वाराणसी, सन.१९८९ पाणिनीयशिक्षा, पृ.३१७-३२२
- संपा. गोपालदत्त पांडेय, अष्टाध्यायी, प्रका.चौखंबा सुरभारती प्रकाशन, वाराणसी, सन२००४
- Whitney W.D. Caturadhāyika with English translation & critical notes, Caukhamba Publication House,Varanasi, 1962, 2nd edition.
- Whitney W.D. Taittiriya Pratisākhyam with English translation, Motilal Banarsidas, Delhi,1975
- Siddheshvar Varma, Critical Studies in Phonetic Observations of Indian Grammarians, Munshiram Manoharlal Publishers Pvt. 1961.